मस्तुर्थ्यामपथ्यम्।

रतम्। स्वेदः। श्रमः। तैलम्। गुर्व्वन्नम्। क्रोधः। आतपः। दुष्टाम्बु। दुष्टपवनः। विरुद्धाशनम्। निष्पावः। आनूपशाकम्। लवणम्। विषमाशनम्। कटु। अम्लम्। वेगरोधः॥ * ॥

अथ क्षुद्ररोगे पथ्यापथ्यम्। यथा,—

क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु।
दोषान् दूष्यानवस्थाश्च निरीक्ष्य मतिमान् भिषक्।
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः।
यथादोषं यथादुष्टं यथादृष्टञ्च कल्पयेत्॥ * ॥

अथ मुखरोगे पथ्यम्।

स्वेदः। विरेकः। वमनम्। गण्डूषः। प्रतिसारणम्। कवलः। असृक्स्रुतिः। नस्यम्। धूमः। शस्त्राग्निकर्म्मणी। तृणधान्यम्। यवः। मुद्गः। कुलत्थः। जाङ्गलरसः। दृहत्प्रोष्ठी। कारवेल्लम्। पटोलम्। बालमूलकम्। कर्पूरनीरम्। ताम्बूलम्। तप्ताम्बु। खदिरः। घृतम्। कटु। तिक्तम्॥ * ॥

मुखरोगे अपथ्यम्।

दन्तकाष्ठम्। स्नानम्॥ अम्लम्। मत्स्यः। आनूपामिषम्। दधि। क्षीरम्। गुड़ः। माषम्। रूक्षान्नम्। कठिनाशनम्। अधोमुखशयनम्। गुरु। अभिष्यन्दकारि। दिवानिद्रा॥ * ॥

अथ कर्णरोगे पथ्यम्।

स्वेदः। विरेकः। वमनम्। नस्यम्। धूमः। सिराव्यधः। गोधूमः। शालिः। मुद्गः। यवः। प्रतनहविः। लावः। मयूरः। हरिणः। तित्तिरिः। वनकुक्कुटः। पटोलम्। शिग्रु। वार्त्ताकुः। सुनिषण्णम्। कठिल्लकम्। रसायनप्रथम्। ब्रह्मचर्य्यम्। अभाषणम्॥ * ॥

कर्णरोगे अपथ्यम्।

विरुद्धान्नपानम्। वेगरोधः। प्रजल्पनम्। दन्तकाष्ठम्। शिरःस्नानम्। व्यवायः। श्लेष्मलम्। गुरु। कण्डूयनम्। तुषारः॥ * ॥

अथ नासारोगे पथ्यम्।

निर्व्वातनिलयस्थितिः। प्रगाढ़ोष्णीषधारणम्। गण्डूषः। लङ्घनम्। नस्यम्। धूमः। छर्द्दिः। सिराव्यधः। कटुचूर्णं नासारन्ध्रे निःक्षिप्य क्षिःप्रवेशनम्। स्वेदः। स्नेहः। शिरोऽभ्यङ्गः। पुराणा यवशालयः। कुलत्थमुद्गयोर्यूषः। ग्राम्यजाङ्गलजा रसाः। वार्त्ताकुः। कुलकम्। शिग्रु। कर्कोटः। बालमूलकम्। लशुनम्। दधि। तप्ताम्बु। वारुणी। कटुत्रयम्। कटु। अम्लम्। लवणम्। स्निग्धम्। उष्णम्। लघुभोजनम्॥ * ॥

नासारोगे अपथ्यम्।

विरुद्धान्नम्। दिवास्वप्नः। अभिष्यन्दि। गुरूणि। स्नानम्। क्रोधः। शकृन्मूत्रवाष्पाणां वेगधारणम्। शोकः। द्रवम्। भूशय्या॥ * ॥

अथ नेत्ररोगे पथ्यम्।

आश्च्योतनम्। लङ्घनम्। अञ्जनम्। स्वेदः। विरेकः। प्रतिसारणम्। प्रपूरणम्। नस्यम्। असृङ्मोक्षः। शस्त्रक्रिया। लेपनम्। आश्च्यपानम्। सेकः। मनोनिर्वृतिः। अङ्घ्रिपूजा। मुद्गः। यवः। लोहितशालिः। लावः। मयूरः। वनकुक्कुटः। कूर्म्मः। कुलिङ्गः। कपिञ्जलः। कौर्म्मं हविः। वन्यकुलत्थयूषः। पेया। विलेपी। लशुनम्। पटोलम्। वार्त्ताकुः। कर्कोटकः। कारवेल्लम्। नवीनमोचम्। नवमूलकम्। पुनर्नवा। मार्कवः। काकमाची। पत्तूरशाकम्। कुमारिका। द्राक्षा। कुस्तुम्बुरु। माणिमन्थम्। लोध्रम्। वरा। क्षौद्रम्। उपानहौ। नारीपयः। चन्दनम्। इन्दुखण्डम्। तिक्तम्। लघु॥

नेत्ररोगे अपथ्यम्।

क्रोधः। शोकः। मैथुनम्। अश्रुवायुविण्मूत्रनिद्रावमीनां वेगरोधः। सूक्ष्मेक्षणम्। दन्तविघर्षणम्। स्नानम्। निशाभोजनम्। आतपः। प्रजल्पनम्। छर्द्दनम्। अम्बुपानम्। मधूकपुष्पम्। दधि। पत्रशाकम्। काठिल्लम्। पिण्याकः। विरूढ़कम्। मत्स्यः। सुरा। अजाङ्गलमांसम्। ताम्बूलम्। अम्लम्। लवणम्। विदाहि। तीक्ष्णम्। कटु। उष्णम्। गुर्व्वन्नपानम्॥ * ॥

अथ शिरोरोगे पथ्यम्।

स्वेदः। नस्यम्। धूमपानम्। विरेकः। लेपः। छर्द्दिः। लङ्घनम्। शीर्षवस्तिः। रक्तमुक्तिः। वह्निकर्म्म। उपनाहः। जीर्णसर्पिः। शालिः। षष्टिकः। यूषः। दुग्धम्। धन्वमांसम्। पटोलम्। शिग्रु। द्राक्षा। वास्तूकम्। कारवेल्लम्। आम्रम्। धात्री। दाड़िमम्। मातुलुङ्गम्। तैलम्। तक्रम्। काञ्जिकम्। नारिकेलम्। पथ्या। कुष्ठम्। भृङ्गराजः। कुमारी। मुस्तः। उशीरम्। चन्द्रिका। गन्धसारः। कर्पूरम्॥ * ॥

शिरोरोगे अपथ्यम्।

क्षवजृम्भामूत्रवाष्पनिद्राविड्भागां वेगधारणम्। अञ्जनम्। दुष्टनीरम्। विरुद्धान्नम्। सह्यविन्ध्यसरिज्जलम्। दन्तकाष्ठम्। दिवानिद्रा॥ * ॥

अथ स्त्रीरोगे पथ्यापथ्यम्।

यत्पथ्यं यदपथ्यञ्च रक्तपित्तेषु कीर्त्तितम्।
प्रदरेषु यथादोषं तत्तन्नारी भजेत्त्यजेत्॥
वातव्याधिमतां पथ्यमपथ्यञ्च यदीरितम्।
योनिव्यापत्सु सर्व्वासु तद्विद्याच्च यथामलम्॥ * ॥

अथ गर्भिणीपथ्यम्।

शालिः। षष्टिकः। मुद्गः। गोधूमः। लाजशक्तुः। नवनीतम्। घृतम्। क्षीरम्। रसाला। मधु। शर्करा। पनसम्। कदलम्। धात्री। द्राक्षा। अम्लम्। स्वादु। शीतलम्। कस्तूरी। चन्दनम्। माला। कर्पूरम्। अनुलेपनम्। चन्द्रिका। स्नानम्। अभ्यङ्गः। मृदुशय्या। हिमानिलः। सन्तर्पणम्। प्रियवाक्। मनोरमविहारः। प्रियङ्करान्नपानम्॥ * ॥

गर्भिण्या अपथ्यम्।

स्वेदनम्। वमनम्। क्षारः। कलहः। विषमाशनम्। असात्म्यम्। नक्तञ्चारः। चौर्य्यम्। अप्रियदर्शनम्। अतिव्यवायः। आयासः। भारः। गुरुप्रावरणम्। अकालजागरणं स्वप्नञ्च। कठिनोत्कटकासनम्। शोकः। क्रोधः। भयम्। उद्वेगः। श्रद्धा। वेगविधारणम्। उपवासः। अध्वगमनम्। तीक्ष्णोष्णगुरुविष्टम्भिभोजनम्। नक्तम्। निरशनम्। श्वभ्रकूपेक्षणम्। मद्यम्। आमिषम्। उत्तानशयनम्। स्त्रीणामनीप्सितम्॥ * ॥

अष्टममासमारभ्य गर्भिण्या अपथ्यं यथा,—

तथा रक्तस्रुतिं शुद्धिं वस्तिमायासतोऽष्टमात्।
एभिर्गर्भः स्रवेदामः कुक्षौ शुष्येन्म्रियेत वा॥
भजेन्न नित्यं तिक्ताम्लकटूष्णकषायकान्।
वातलैश्च भवेद्गर्भः कुब्जान्धजड़वामनः॥
पित्तलैः खलती पिङ्गः श्वित्री पङ्गः कफात्मभिः।
अपथ्यमिदमुद्दिष्टं गर्भिणीनां महर्षिभिः॥ * ॥

अथ प्रसूतायाः पथ्यम्।

लङ्घनम्। मृदुस्वेदः। गर्भकोष्ठविशोधनम्। अभ्यञ्जनम्। तैलपानम्। कटुतिक्तोष्णसेवनम्। दीपनम्। पाचनम्। मद्यम्। पुराणषष्टिशालयः। कुलत्थः। लशुनम्। शिग्रु। वार्त्ताकुः। बालमूलकम्। पटोलम्। मातुलुङ्गम्। ताम्बूलम्। दाड़िमद्वयम्। श्लेष्मानिलघ्नानि। सप्ताहात् परं किञ्चित् बृंहणम्। द्वादशाहात् परं आमिषम्। षाड्मासात् परं आहारादियन्त्रणात्यागः॥ * ॥

प्रसूताया अपथ्यम्।

श्रमः। नस्यम्। रक्तमुक्तिः। मैथुनम्। विषमाशनम्। विरुद्धान्नम्। वेगरोधः. असात्म्यम्। अतिभोजनम्। दिवानिद्रा। अभिष्यन्दि। विष्टम्भि गुरुभोजनम्॥

सूतिकाख्येषु रोगेषु वातश्लेष्मोचितानि च।
तत्तद्रोगानुकूल्येन पथ्यापथ्यानि निर्द्दिशेत्॥ * ॥

अथ बालरोगे पथ्यापथ्यम्।

वृद्धानां ज्वरादिषु यत् पथ्यापथ्यं बालानामौचित्यात् तद्विधेयम्। मन्दाग्नौ यत् पथ्यापथ्यं बालानां पारिगर्भिके तद्विधेयम्। आगन्तुकोन्मादिनां यत् पथ्यापथ्यं बालानां ग्रहरोगिणां तद्योज्यम्॥ * ॥

अथ विषरोगे पथ्यम्।

अरिष्टाबन्धनम्। मन्त्रक्रिया। छर्द्दिः। विरेचनम्। रूक्षणम्। शोणितागृष्टिः। परिषेकः। अवगाहनम्। हृदयावरणम्। नस्यम्। अञ्जनम्। प्रतिसारणम्। उत्कर्त्तनम्। प्रधमनम्। प्रलेपः। वह्निकर्म्म। उपधानम्। प्रतिविषम्॥ धूपः। संज्ञाप्रबोधनम्। शालिः। षष्टिकः। कोरदूषः। प्रियङ्गुः। मुद्गः। हरेणुः। तैलम्। सर्पिः। शिखितित्तिरिलावैणगोधाखञ्चाविदामिषम्। वार्त्ताकुः। कुलकम्। धात्री। निष्पावः। तण्डुलीयः। मण्डूकपर्णी। जीवन्ती। सुनिषण्णम्।